International Journal of Sanskrit Research 2020; 6(5): 155-157

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 155-157
© 2020 IJSR
www.anantaajournal.com
Received: 22-07-2020
Accepted: 25-08-2020

**मासकुरा खातुन**
सहकारी अध्यापिका, बोलपुर कॉलेज, बोलपुर, बीरभूम, वेस्ट बंगाल, भारत

**Corresponding Author:**
**मासकुरा खातुन**
सहकारी अध्यापिका, बोलपुर कॉलेज, बोलपुर, बीरभूम, वेस्ट बंगाल, भारत

# वैदिकयुगे नारीशिक्षया सह आधुनिकयुगे नारीशिक्षायाः तुलनात्मकमालोचनम् वर्तमानस्त्रीशिक्षायां सरकारीयोजना चः एकम् समीक्षणम्

**मासकुरा खातुन**

**भूमिकाः**
ज्ञानार्थकः √विद् धातोः 'वेदः' शब्दः जातः। विद् अ घञ् उ वेदः 'घञि च भावकरणयोः'[१]। वेदशब्दस्यार्थः ज्ञानम् परमज्ञानम् वा। प्रत्यक्षानुमानोपमानादिप्रमाणेण यत् ज्ञानमुपलभ्यते तदेव इन्द्रियजज्ञानम् परन्तु इन्द्रियं विना यद्ज्ञानमुपलभ्यते तच्चातिन्द्रीयज्ञानम्। अतीन्द्रियज्ञानलाभस्योपायः वेदः। आचार्येण मनुना वेदः अखिलधर्मस्य मूलम् इति उक्तः, --- 'वेदोऽखिलो धर्ममूलम्।'[२] धर्मशास्त्रकारस्य गौतमस्य मतेनापि वेदः धर्मस्य मूलम् इति। धर्म-कर्म-यज्ञ-स्वर्ग-परलोकतत्त्व-अदृष्टविषयकतत्त्वञ्च वेदे विद्यन्ते। ब्रह्म-मोक्ष-जगदोत्पत्यादिश्च वेदे परिलक्ष्यन्ते। अस्मिन् वेदे तथा वैदिकसाहित्ये नारीशिक्षायाः प्रसारः कीदृशः आसीत् तथा वर्तमानयुगे नारीशिक्षायाः प्रसारः कीदृशः? अनयोः द्वयोर्मध्ये एकम् तुलनात्मकमालोचम् तथा आधुनिकसमये स्त्रीशिक्षाप्रसारे सरकारस्य भूमिका का; अयमेव अस्य शोधपत्रस्य विषयः।

**विषयवस्तुः** वेदस्य अन्यत् नाम श्रुतिः; यतः अयमेव श्रवणमाध्यमेण गुरु-शिष्यपरम्परायां प्रचलितरासीत्। वेदः त्रयी, त्रयीविद्या, आगमः, छन्दस् इत्यादि नाम्ना ख्यातः।

## प्रस्तावना

**वैदिकसाहित्यम्:**
ऋक्-साम-यजुः-अथर्वः इमे चत्वारः वेदशब्देन वोध्यते; प्रत्येकवेदमध्ये संहिता-ब्राह्मण-आरण्यक-उपनिषद् इति चत्वारः अंशाः विद्यन्ते। वेदचतुष्टयेन सह षड्वेदाङ्गानि यथा शिक्षा-कल्प-छन्द-ज्योतिष-निरुक्त-व्याकरणानि 'वैदिकसाहित्य-रूपेण' आद्रियते संस्कृतसाहित्ये।
अत्र संक्षिप्ताकारेण वैदिकसाहित्यस्य परिचयः उपस्थापितः शोधपत्रेऽस्मिन्।

**ऋक्वेदः -** ऋक्संहिताविषये ऋग्वेदभाष्योपक्रमनिकाकारेण उक्तम्, --- 'तेषामृग् यत्रार्थवशेन पादव्यवस्था।'[३] अर्थात् पादवद्ध-छन्दवद्ध-अर्थयुक्तः मत्रः ऋक् इति। ऋक्संहिता प्राचीनतमा संहिता। संहितायाः अस्याः द्विविधः विभागः वर्तते। यथा- प्रथमतः -- मण्डल-अनुवाक्-सुक्त-ऋचः; द्वितीयतः -- अष्टक-अध्याय-वर्ग-मन्त्राश्च। ऋक्संहितायां दश मण्डलानि, पञ्चाशीतीति अनुवाकाः; सप्तदशोत्तरसहस्राणि सूक्तानि तथा षट्शतोत्तरदशसहस्राः ऋचः सन्ति। अष्टकादिभेदे अस्यां संहितायां अष्टाष्टकाः, चतुष्षष्ठ्याध्यायाः, षड़ाधिकद्विसहस्राः वर्गाः, षट्शताधिकदशसहस्राः मन्त्राः वर्तन्ते। प्रत्येकेषु वेदेषु संहिता व्यातीता ब्राह्मणादि वर्तन्ते; अत्र ब्राह्मण-आरण्यक-उपनिषदां केवलं नामोल्लेख्यते, --

| | | |
|---|---|---|
| ब्राह्मणम् | - | ऐतरेयब्राह्मणं, कौशितकीब्राह्मणं सांख्यायणब्राह्मणं वा। |
| आरण्यकम् | - | ऐतरेयारण्यकं, कौशितक्यारण्यकं सांख्यायणारण्यकं वा। |
| उपनिषद् | - | ऐतरेयोपनिषद्, कौशितक्योपनिषद् सांख्यायणोपनिषद् वा। |

**सामवेदः -** गीतियुक्ताः मन्त्राः सामसंहिता इति। संहितायामस्यां विद्यमानेषु मन्त्रेषु अधिकाः मन्त्राः ऋग्वेदाद् गृहीताः। अस्यां संहितायां १८१० संख्यकाः मन्त्राः वर्तन्ते। केवलं पञ्चसप्ततिमन्त्राः सामवेदस्य सतन्त्राः, एतत्व्यतीताः सकलमन्त्राः ऋग्वेदात् संगृहीताः। मन्त्रद्वयोर्मध्ये पार्थक्यम् इदृशम् यथा- ऋग्मन्त्राः गीतिविहीनाः, साममन्त्राः गीतियूक्ताः इति। भाष्योपक्रमणिकायां सामवेदस्य लक्षणरूपेण सायणाचायेण 'गीतिषु सामाख्या'[४] इति जैमिणीयसूत्रमुक्तम्।
सामवेदस्य शाखाविषये मतानैक्यं वर्तते। पुराणादौ सामवेदस्य सहस्रशाखायाः उल्लेखाः सन्ति। परन्तु तासां सर्वासां नाम नोपलभ्यन्ते। अधुना सामवेदस्य निस्रः शाखाः उपलभ्यन्ते, यथा- राणयणीय, कौभुमीय जैमिनीय च। अत्र कौभुमीयशाखायाः पूर्वार्चिकः उत्तरार्चिकश्च द्वौ भेदौ वर्तेते। सामवेदस्य ब्राह्मणादि यथा, --
ब्राह्मणम् -- ताण्ड्यब्राह्मणं पञ्चविंशब्राह्मणं वा, षड़विंशब्राह्मणं, छान्दोग्यब्राह्मणं, जैमिनीयब्राह्मणं तवलकारब्राह्मणं च।
आरण्यकम् -- छान्दोग्यारण्यकम्।
उपनिषद् -- छान्दोग्योपनिषद् केनोपनिषद् च।

**यजुर्वेदः -** ऋग्मन्त्राः साममन्त्राश्च व्यातीताः अवशिष्टाः मन्त्राः 'यजुः' इति नाम्ना अभिहिताः, 'शेषे यजुःशब्दः।'[5] यजुर्वेदस्य इदृशं लक्षणं जैमिनीना कृतम्। ऋक्संहिता सामसंहिता च पद्यमयाः परन्तु यजुःसंहिता गद्यपद्यमया। यजूर्वेदस्य भागद्वयं वर्तते, यथा -- कृष्णयजुर्वेदः तैतिरीयसंहिता वा शुक्लयजुर्वेदश्च वाजसनेयीसंहिता वा। यजुर्वेदस्य ब्राह्मणादि यथा, ---

**कृष्णयजुर्वेदः --** ब्राह्मणम् -- तैत्तिरीयब्राह्मणम्।
आरण्यकम् -- तैत्तिरीयारण्यकम्।
उपनिषद् -- कठ-शेताश्वतर-महानारायण-मैत्रायणी-तैत्तिरीयोपनिषदः।

**शुक्लयजुर्वेदः** -- ब्राह्मणम् -- शतपथब्राह्मणम्।
आरण्यकम् -- वृहदारण्यकम्
उपनिषद् -- वृहदारण्यकोपनिषद् ईशोपनिषद् च।

**अथर्ववेदः --** अस्य वेदस्य अन्यत् नाम अथर्वाङ्गिरसः। 'अथर्व' इति शब्देन भेषजविद्या तथा पौष्टिकादिमाङ्गलिकक्रिया वोध्यते। 'आङ्गिरस'शब्देन शत्रुवध-मारण-उचाटनादि-अमाङ्गलिकक्रिया वोध्यते। अस्मिन् वेदे माङ्गलिक-अमाङ्गलिके उभयविधे क्रिये उपलभ्येते। अस्य वेदस्य अधिकाः मन्त्राः ऋग्वेदात् गृहीताः।
अथर्ववेदसंहितायां विंशतिकाण्डानि, अष्टत्रिंशतिप्रपाठकाः, नवति अनुवाकाः, एकत्रिंशत्याधिकसप्तशतिसंख्यकानि सूक्तानि षट्सहस्राः मन्त्राः वर्तन्ते। अथर्ववेदस्य ब्राह्मणादि यथा, --
ब्राह्मणम् -- गोपथब्राह्मण्।
आरण्यकम् -- नास्ति।
उपनिषद् -- प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डुक्योपनिषद् च।

एतद्व्यतीतानि षड्वेदाङ्गानि यथा -- शिक्षा-कल्प-निरूक्त-छन्द-व्याकरण-ज्योतिषाणि वैदिकसाहित्यमध्ये वर्तन्ते। शिक्षा-छन्दौ वेदानां पठन-पाठने, व्याकरण निरुक्ते वेदानामर्थागमे, ज्योतिष-कल्पे वेदानां कर्मानुष्ठाने च सहायकाः भवन्ति। षड्वेदाङ्गेन सह चत्वारवेदान् मुण्डकोपनिषदि अपराविद्या इति कथ्यते, -- 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः-शिक्षाकल्पोव्याकरणं-निरूक्तंछन्दोज्योतिषम्।'[6] अनेन प्रकारेण वैदिकसाहित्यं संक्षिप्ताकारेण अत्र अलोचितम्।

**वैदिकयुगे नारीशिक्षा**

वैदिकयुगे नारीशिक्षायाः प्रसारः कीदृशः आसीत् तद्विषयः अस्मिन् षोधपत्रे आलोच्यन्ते।
अतिप्राचीनकालात् पुरुषाणां शिक्षा सर्वसमाजे परिलक्ष्यते परन्तु वैदिकयुगे न केवलं पुरूषाणां शिक्षा अविराजयन्त तदा नार्योऽपि शिक्षायां अग्रगण्याः आसन्। ताः नार्यः शिक्षाक्षेत्रे पुरूषाणां प्रायाः समकक्षाः आसन्। मन्त्राणां द्रष्टारूपेण पुरुषऋषिणां संख्याः अधिकाः परन्तु आसीत् वैदिकयुगे नारीऋषयः अपि न अल्पसंख्यकाः इति। तत्काले नारीऋषयः यथा, -- विश्ववारा (ऋ.वे.-१/१२६), लोपामुद्रा (ऋ.वे.-१/१७९), आम्भृनिवाक् (ऋ.वे.-१०/१२५), जुहु, पौलमी, काक्षीवती, घोषा, जडिता, श्रद्धा, कामायणी प्रभृतयः। संवाद्-सूक्तेष्वपि अनेकानां नारीनां विवराणि सन्ति। यमी, इन्द्रानी, सर्पराज्ञी उर्वषी च संवादसूक्ते वर्तन्ते। वैदिकयुगे ब्राह्मण-क्षत्रिय-वैश्यनारीनां वेदाध्ययने अधिकारः आसीत्; उक्तसम्प्रदायत्रयस्य नार्यः वेदाध्ययन-अध्यापनासु नियुक्ताः अभवन्।
तत्कालीनसमाजे अर्थात् वैदिकसमाजे नारीऋषयः अतीव प्रभावसम्पन्नाः आसन्। ऋग्वेदस्य वाक्सूक्तात् तत्कालीनसमाजसंस्कृतौ नारीऋषिणां प्रभावाः उपलभ्यन्ते। 'वाक्सूक्ते' आम्भृणिकन्यया वाकेन आत्मानं देवीरूपेण परिचयं प्रदत्तम्। तेतनोक्तम्, --

'अहं रूद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रवरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा।।'
(ऋ.वे. १०/१२५/१)।

अर्थात् सा वाक्देवी रुद्रदेवैः सह वसुदेवैः सह च विचरणं करोति। सा आदित्येन सहिता वसति, मित्रवरुणौ धारयति, इन्द्राग्नौ च अवलम्वनं ददातीति। अस्मात् सूक्तात् पुनः उपलभ्यते यत् -- सा आम्भृणिवाक् समग्रस्य जगतः ईश्वरी, उपासकानां धनदात्री इति च, --- 'अहं राष्ट्री वसुनां संगमनी' (ऋ.वे. १/१२५/३)। सा वाक् ब्रह्मतत्त्वसाक्षात्कारिणी अपि आसीत्, एतेभ्यः वाग्येभ्यः वैदिक समाजे नारीणां प्रभावाः उपलभ्यन्ते।

तत्कालीनसमाजे नार्यः अग्रगन्याः आसन्। तदा पुरुषवत् नारीणामपि उपनयसंस्कारस्य प्रचलनम् आसीत्। उपनयनकाले नारीः गायत्रीमन्त्रोच्चारणं कारयन्ति स्म अपि तु पवित्र-अग्न्याधान् वेदादिग्रन्थपाठश्च कारयन्ति स्म। स्मृतिकारेण यमेनोक्तम्,--

'पुराकाले कुमारीणां मौञ्जिवन्धनमिष्यते।
अध्यापनं च वेदानां सावित्रीवचनं तथा।।'[7]

पुराकाल समाजे ब्रह्मचारीपुरुषवत् ब्रह्मचारीनार्यपि आसीत्। एषा नारी 'ब्रह्मवादिनी' इति नाम्ना ख्याता। 'ब्रह्मवादिनी' इति नारी विवाहवन्धनेन आत्मानं नावद्धयत् गार्हस्थाश्रमे च सा नाप्रवेशयत्। आसीत् 'गार्गी' ब्रह्मवादिनी नारी।
न केवलं अध्ययन-अध्यापनासु अपि तु यज्ञेसु नारीनां भूमिका आसीत् गुरुत्वपूर्णा। पत्नीसहपुरुषाणां यज्ञः करणीयः -- इदृशा वार्ता वेदे वर्तते। विपत्नीकानां यज्ञेषु अधिकारः नासीत्। शतपथब्राह्मणे ऋषिणा उल्लिखितं यत् पत्नी एव यज्ञस्य अर्धांशा इति, -- 'अर्धो ह वा एष यज्ञस्य यत् पत्नी' (शतपथ. ५/२/१/४)। वैदिकयुगे प्रत्येकेषु यज्ञेषु 'पत्नीसंयाजः' नामकः यागैकः अनुष्ठितमभवत्। यागेऽस्मिन् यजमानपत्न्याः वेदमन्त्रपाठस्य रीतिरासीत्। तस्याः यजमानपत्न्याः यज्ञकाले यज्ञवेद्याः अग्रभागे पुरोहितेन सह उपविश्य यागकरणस्य निमयः आसीत्। तत्कालीनयुगे नारीणां मन्त्रोच्चारणे अधिकारः आसीत्। विवाहादि अनुष्ठाने नववध्वोः मन्त्रोच्चारणस्य रीतिरासीत्। नववध्वोः मन्त्रोचारणमिदृशमासीत् यथा, -- 'ध्रुवं द्यौ ध्रुवा पृथिवी ध्रुवेयं ध्रुवाहं पतिकुले भुयासम्' अर्थात् यथा द्यावापृथिव्यौ ध्रुवौ तथा सा स्त्री पतिकुले स्थिराभविष्यतीति भावः। प्राचीनकाले नार्यः अध्यापना चक्रुः। अनेकाः अध्यापिकाः आसन् वैदिकयुगे। तदा विदुष्यः नार्यः अभावाः नासान्। आसीत् वचक्नुकन्या गार्गी विदुषी-ज्ञानी-तपस्विनी च। सा विदुषी गार्गी ऋषिं याज्ञवल्कं ब्रह्मतत्त्व-विषयकवितर्के आह्वानमकरोत्। वादानुवादानन्तरम् अर्थात् विवादान्ते तौ उभयौ अपराजितौ आस्ताम्। वृहदारण्यकोपनिषदि ३/६, ३/८ इति अंशे उक्तं वाद-विदादं विद्यते।
वैदिकयुगे मौक्ष्यकाम्यः नार्यः अभावाः नासन्। आसीत मैत्रेयी इदशा नारी। वृहदारण्यकोपनिषदि याज्ञवल्क-मैत्रेयीकथा विषेशरूपेण ख्याता। वृहदारण्यकोपनिषदः द्वितीयाध्यायस्य चतुर्थे ब्राह्मणे याज्ञवल्केन सह तस्य पत्न्याः मैत्रेय्याः कथोपकथनम् अतीव आकर्षणीयं विषयम्। ऋषेः याज्ञवल्कस्य द्वे पत्न्यौ आस्ताम्, यथा- कात्यायनी मैत्रेयी च। तयोर्मध्ये मैत्रेयी आसीत् अध्यात्मभावापन्ना। प्रवज्यालाभात् पूर्वं ऋषिः पत्नीद्वयोर्मध्ये सम्पदविभागस्य अभिलाषमप्रकाशयत्। तदा मैत्रेयी याज्ञवल्कमपृच्छत् यत् वित्तेनामृतत्तलाभं भविष्यति न वा इति, -- 'यन्नु म इयं भगोः सर्व्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृतं स्यामिति' (वृह. २/४/२, पृ. ६१३)। तदा याज्ञवल्केनोक्तम्, -- 'नेति यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति' (वृह. २/४/२, पृ. ६१३)। अर्थात् वित्तेन संसारजीवनं सुखसम्पन्नं भविष्यतीति परन्तु तेन नामृतत्त्वलाभं भवति। एतच्छ्रुत्वा मैत्रेय्या उक्तम्, 'येनाहं नामृता स्यां किमहं तेन कुर्याम्, यदेव भगवान् वेद तमेव मे ब्रुहीति।' (वृह. २/४/३, पृ. ६२४); अर्थात् येन वस्तुना अमृतत्त्वलाभं न भवति, तद्वस्तुं नीत्वा अहं किं करिष्यामीति भावः। मैत्रेय्याः वाक्यमिदमतीव प्रसिद्धं युग-युगान्तरे तथा काल-कालान्तरे।
सुप्राचीनकाले तथा वैदिकयुगे समाजे कन्यासन्तानाः हेयाः नासन्। तदानीन्तनकाले मनुष्याः कन्यासन्तानलाभाय कामनां कृतवन्तः। विदुषीकन्यालाभाय ताः आज्यमिश्रिततन्डुलरन्धनं कृत्वा खादितवन्त्यः।
साहित्ये नृत्यगीते, कन्ठसङ्गीते-यन्त्रसंगीते च वैदिकस्त्रियः निपुणाः आसन्। अलंकरणे निपुणाः नार्यः वस्त्रालंकरणम् चक्रुः। न केवलं शिक्षायां, अलंकरणे, नृत्यगीते अपि तु वैदिकनार्यः युद्धे निपुणाः सुकौशलाश्च आसन्। ऋग्वेदस्य वहुषु सुक्तेषु योद्धानारीणां विवरणं वर्तते। राजन्यवर्गस्य महिषीगणः रणानङ्गनस्य पुरोभागे स्थित्वा युद्धं अकुर्वन् इति। ऋग्वेदस्य प्रथममण्डलस्य षोड़षाधिकशतसुक्तस्य पञ्चदशमन्त्रे युद्धेन खेलपत्नीविपशलायाः सकृत् पदं विनष्टं जातमिति इदृशं विवरण वर्तते। दशममण्डलेऽपि मुदगलस्य पत्नेः 'युद्धं' विवृण्वते ऋषिणा, तेनोक्तम्, ---

'उत्स्म वातो वहति वासो अस्याः अधिरथं यदजयत्सहस्रम्।
रथीरभून्मुद्गलानी गविष्ठो भरे कृतं व्याचेदिन्द्र सेना।।'
(ऋ.वे.-१०/१०२/२)।

अर्थात्, यदा मुद्‌गलपत्नी रथारूढं भूत्वा सहस्रविजयिनी अभूत् तदा वायुना तस्याः वस्त्रसञ्चालनं कृतम्। सा मुद्‌गलपत्नी गाभीजयकाले रथी भूत्वा शत्रुगणात् गाभीसमुहं उद्धारं कृतवती। वैदिकनार्यः युद्धेऽपि पारदर्शिण्यः आशन्।
अतएव वैदिकनार्य्याः शिक्षा-संस्कृति-कला-अङ्कन-नृत्य-गीत-अध्ययन-अध्यापना-युद्धादिषु विषयेषु विज्ञाः आसन्।

**वर्तमानयुगे नारीशिक्षाः**
वर्तमानयुगे नार्यः अतीव आधुनिकाः। ताः नार्यः शिक्षायां पुरुषाणां समकक्षाः। अध्ययन-अध्यापनासु अग्रगण्याः। यानवाहनपरिचालने विमानपरिचालने च स्त्रीलोकानां भूमिकाः यथेष्टाः। नृत्य-गीते ताः रमण्यः पुरुषात् पटीयस्यः। न केवलं ताः रन्धनकार्यं गृहकार्यं च कुर्वन्ति अपि तु दप्तरादि परिचालयन्ति ताः महत्याः नार्यः। वर्तमानसंस्कृतौ सभ्यतायां नार्यः अतीव अग्रगण्याः। अधुना अस्माकं देशे विदेशे वा वहवाः रमणीयाः राज्यं राष्ट्रं च परिचालयन्ति इति। भारतवर्षस्य 'पश्चिमबङ्ग' इति राज्यं परिचालयति ममता व्यानार्जी नाम्ना महीयसी नारी। आसीत प्रतिभा देवी सिं पाटिल महोदया भारतवर्षस्य राष्ट्रपतिः। वर्तमानभारतवर्षस्य अर्थमन्त्रिः (finance minister) इति पदे निर्मला सितारामन् इति नाम्ना महती रमणी विराजते। विदेशेऽपि अमात्यादिपदेषु रमणीयाः नियुक्ताः, यथा -- अधुना बंगलादेशस्य प्रधानमन्त्रिः सेखहासिना, सा एका नारीति, उक्ताः महत्यः नार्यः राजीनीतिज्ञाः अर्थनीतिज्ञाश्च। समाजे तासां ख्यातिरस्ति।
न केवलं राजनीतौ अर्थनीतौ च, ताः रमणीयाः क्रिड़ाक्षेत्रे, युद्धपरिचालनायां विचारविभागपरिचालनायां च सार्थकाः। सामरिकक्षेत्रे नारीणाम् अतीव गुरुत्वपूर्णाः भूमिकाः वर्तन्ते। साहित्ये, काव्यचरनायां, चलच्चित्रपरिचालनायां, अभिनये, अन्यायस्य प्रतिवादे सर्वत्रेव नार्यः सचलाः। नार्यः गवेषणान्ते नवोद्‌भावनमपि कुर्वन्ति। महाकाशगमनेऽपि तासां भूमिका वर्तते। महाकाशगमनकारी अन्यतमा प्रसिद्धा रमणी कल्पना चाउला इति, सा जगति अतीव ख्याता। वर्तमाने नार्यः महाकाशगमने, पर्वतारोहने, विज्ञानमनस्कतायां, गवेषणायां च अतीव निपुणाः पारदर्श्यश्च।
वर्तमानकालः विज्ञानस्यकालः, उग्रगत्याः कालः, विकाशस्ययुगः। अश्मिन् काले रमणीयाः अग्रगण्याः, निपुणाः, सार्थकाः पारदर्शश्च।

**वर्तमानकाले नारीशिक्षायां सरकारी योजनाः**
अधुना स्त्रीशिक्षा वर्धनाय सरकारः, देशाधिपतिः, राज्याधिपतिः च वहवाः योजनाः युज्यन्ते। वर्तमाने दरिद्रशिक्षार्थीणां शिक्षावर्धनाय भारतवर्शस्य वर्तमानप्रधानमन्त्रिणा सकृत् योजनायाः आरम्भणं कृतम्; इयमेव 'वेटि वाचाओ वेटि पड़ाओ'[८] इति योजना। अनया योजनया सह एका अन्या योजना युक्ता, असौ एव 'सुकन्या समृद्धि योजना' आभ्यां योजनाभ्यां भारतवर्षस्य उत्तरप्रदेश-हरियाना-उत्तराखण्ड-पञ्जाव-विहार-दिल्लि इति स्थानानाम् वालिकाः उपकृताः भवन्तीति। नारीशिक्षाप्रसारणाय अधुना पश्चिमवङ्गस्य मुख्यमन्त्रीणा श्रीमत्या ममताव्यनार्जीणा कृतम् विविधम् प्रकल्पम्। अमूः यथा कन्याश्रीप्रकल्पम्, सवुजसाथीप्रकल्पम्, रूपश्रीप्रकल्पम्, वालाश्रीप्रकल्पम् इत्यादयः।[९] पञ्जावराज्यस्य मनसाजेलायां वालाशिक्षाप्रसारणाय तथा वालाः शिक्षां प्रति आकर्षयितु 'उड़ान-सपने दी दुनिया दे रूबरू (udan live your dream for one day)'[१०] इति प्रकल्पमारम्भणं कृतम्।

अनेन विविधैः प्रकल्पैः वर्तमानभारतवर्षस्य नारीशिक्षा प्रगतिशीला।

**उपसंहारः**
अधुना विज्ञानस्य युगः, विकाशस्य कालः, अग्रगत्याः समयः। अस्मिन् विज्ञानस्य विकाशस्य-अग्रगत्याः युगे नार्यः पुरुषवत् अग्रगण्याः तथा तासां शिक्षा अपि अधुना अग्रगतिशीला। आधुनिककाले नारीशिक्षायाः विकाशे वहवाः सरकारीयोजनायाः अवदानमस्ति। वर्तमाने नार्यः अग्रगण्याः परन्तु वैदिकनार्यः हीनाः नासन् तारपि आधुनिक रमणीवत् नृत्ये-गीते-अभिनये-गृहपरिचालनायां-कृषिकार्ये-युद्धपरिचालनायां-सामरिकक्षेत्रे-अध्ययन-अध्यापनायां च निपुणाः आसन्। यद्यपि वैदिकनार्यः शिक्षिता आसन् तथापि आधुनिक सरकारीयोजनादि वर्तमाननारीणां अग्रगत्यां गुरुत्वपूर्णम्। अधुना कन्या भ्रुनहत्यायाः प्रभावः संकुचितः जातः, वाल्यविवाहः रुद्धः जातः, निम्नश्रेण्याः वालाः अपि उच्चतरशिक्षायां अग्रवर्तीभवति। विविधया योजनया प्रकल्पेन च नारीशिक्षा साफल्यस्य पथि गच्छति।

**पद्धतयः**
ऐतिहासिकपद्धतिः, विवरणात्मकपद्धतिः, तुलनात्मकपद्धतिश्च।

**पादटीका :**
१. पा. सु.-६/४/२७ - अष्टा., पृ. १८७
२. मनु. सं २/६, पृ. १४
३. जै. सू. - २/१/३५; ऋ.भा., पृ. ७३
४. जै. सू. २/१/३६, ऋ. भा., पृ. ७३
५. जै. सू. २/१/३७, ऋ. भा., पृ. ७३
६. मु. उ. १/१/५, पृ. ६
७. वेदेरपरिचय, योगिराजवसु
8. en.m.wikipedia.org
9. en.m.wikipedia.org
10. en.m.wikipedia.org

**संक्षेपसूचि :**
१. अनुवा. -- अनुवादः
२. अष्टा. -- अष्टाध्यायीसूत्रपाठः
३. ऋ. वे. - ऋग्वेद
४. ऋ. भा. -- ऋग्वेदभाष्योपक्रमणिका
५. जै. सू. - जैमिनीयसूत्रम्
६. पा. सू. - पाणिनीय सूत्रम्
७. पुः मुः - पुनर्मुद्रनम्
८. पृ. - पृष्ठा
९. वं. अनु. - वङ्गानुवादः
१०. वृह. - वृहदारण्यकोपनिषद्
११. मनु. सं - मनुसंहिता
१२. मु. उ. - मुण्डकोपनिषद्
१३. शतपथ - शतपथब्राह्मणम्
१४. सम्पा. - सम्पादकः
१५. सं. - संस्करणम्
१६. १म. मु. - प्रथण मुद्रण
१७. ३य. - तृतीय, ४र्थ. - चतुर्थः, ५म. - पञ्चम
१८. comp. - compiler

**ग्रन्थपञ्जिः :**

१. *अष्टाध्यायीसूत्रपाठः : वार्तिक-गणपाठ-धातुपाठ-पाणिनीयशिक्षा-परिभाषापाठ-सहितः* (द्वितीय संस्करणम्)। सम्पा. संकररामशास्त्री। मद्रास मैलापुर। श्रीवालमनोरमामुद्रणालय। १९३७।
२. *ऋग्वेदसंहिता*। वं. अनु. रमेशचन्द्र दत्त। कलिकाता। ज्ञानभारती प्रकाशनी। पुः मुः रवीन्द्रतिथि, वैशाख, शकाब्द - १८८५।
३. *ऋग्वेदसंहिताः श्रीमत्सायनाचार्यविरचितभाष्यसमेता (१-१० मण्डलात्मकः)*। सम्पा. सोनटक्के इत्युपाह्नः श्रीपादसूनुः नारायणशर्मा, काशीकारोपाह्नः गणेशसूनुः चिन्तामणिशर्मा। ३य-४र्थ भागः। शके - १८६८।
४. वन्दोपाध्याय, शान्ति। *वैदिक साहित्येर रूपरेखा*। कोलकाता। आगष्ट २००३, १म मु. १९९३।
५. *वेदेर परिचय*। सम्पा. योगिराज वसु। कोलकाता। फार्मा के. एल. एम् प्राइभेट लिमिटेड। १म. मु. १९७०। एकादश मु. २०१५।
६. *वेद संकलन*। सम्पा. उदयचन्द्र वन्दोपाध्याय। कोलकाता। संस्कृत वुक डिपो। १म. सं. १४०२, ३य. सं. २००४ (१म खण्ड)। आगष्ट २००६ (२य खण्ड)।
७. *वृहदारण्यकोपनिषद्*। अनुवा. ओ सम्पा. दुर्गाचरण सांख्य वेदान्त तीर्थः। कलकाता। देव साहित्यकुटीर प्राइभेट लिमिटेड। २य भागः। ५म. सं. जुलाई २०११।
८. मनु। *मनुसंहिताः द्वितीयोऽध्यायः*। सम्पा. अन्नदाशङ्कर पाहाड़ी। कलकाता। संस्कृत वुक डिपो।
९. *मुण्डकोपनिषद्*। सम्पा. स्वामी भूतेशानन्द। कलकाता। उद्बोधन कार्यालय। १म सं. १३८५। ५म. पु. मु. २००५।
१०. सायणाचार्यः। *ऋग्वेदभाष्योपक्रमणिका*। सम्पा. शान्ति वन्दोपाध्याय। कलिकाता। संस्कत पुस्तक-भाण्डार। अक्टोवर २००५।
११. APTE Vasudeo Govind. *The Concise Sanskrit English Dictionary*. Comp. Basudeo Govind Apte. Delhi. MLBD. 2011.